दया शतकं

दया शतकं

प्रपद्ये तं गिरिं प्रायः श्रीनिवासानुकंपया |
इक्षुसारस्रवंत्येव यन्मूर्त्या शर्करायितं || 1 ||

विगाहे तीर्थबहुलां शीतलां गुरुसंततिं |
श्रीनिवासदयांभोधिपरीवाहपरंपरां || 2 ||

कृतिनः कमलावासकारुण्यैकांतिनो भजे |
धत्ते यत्सूक्तिरूपेण त्रिवेदी सर्वयोग्यतां || 3 ||

पराशरमुखान्वंदे भगीरथनये स्थितान् |
कमलाकांतकारुण्यगंगाप्लावितमद्विधान् || 4 ||

अशेषविघ्नशमनमनीकेश्वरमाश्रये |
श्रीमतः करुणांभोधौ शिक्षास्रोत इवोत्थितं || 5 ||

समस्तजननीं वंदे चैतन्यस्तन्यदायिनीं |
श्रेयसीं श्रीनिवासस्य करुणामिव रूपिणीं || 6 ||

वंदे वृषगिरीशस्य महिषीं विश्वधारिणीं |
तत्कृपाप्रतिघातानां क्षमया वारणं यया || 7 ||

निशामयतु मां नीळा यद्भोगपटलैर्ध्रुवं |
भावितं श्रीनिवासस्य भक्तदोषेष्वदर्शनं || 8 ||

कमप्यनवधिं वंदे करुणावरुणालयं |
वृषशैलतटस्थानां स्वयं व्यक्तिमुपागतं || 9 ||

अकिंचननिधिं सूतिमपवर्गत्रिवर्गयोः |
अंजनाद्रीश्वरदयामभिष्टौमि निरंजनां || 10 ||

अनुचरशक्त्यादिगुणामग्रेसरबोधविरचितालोकां |
स्वाधीनवृषगिरीशां स्वयं प्रभूतां प्रमाणयामि दयां || 11 ||

अपि निखिललोकसुचरितमुष्टिंधयदुरितमूर्छनाजुष्टं |
संजीवयतु दये मामंजनगिरिनाथरंजनी भवती || 12 ||

भगवति दये भवत्यां वृषगिरिनाथे समाप्लुते तुंगे |
अप्रतिघमज्जनानां हस्तालंबो मदागसां मृग्यः || 13 ||

कृपणजनकल्पलतिकां कृतापराधस्य निष्क्रियामाद्यां |
वृषगिरिनाथदये त्वां विदंति संसारतारिणीं विबुधाः || 14 ||

वृषगिरिगृहमेधिगुणा बोधबलैश्वर्यवीर्यशक्तिमुखाः |
दोषा भवेयुरेते यदि नाम दये त्वया विनाभूताः || 15 ||

आसृष्टि संततानामपराधानां निरोधिनीं जगतः |
पद्मासहायकरुणे प्रतिसंचरकेळिमाचरसि || 16 ||

अचिदविशिष्टान्प्रलये जंतूनवलोक्य जातनिर्वेदा |
करणकलेबरयोगं वितरसि वृषशैलनाथकरुणे त्वं || 17 ||

अनुगुणदशार्पितेन श्रीधरकरुणे समाहितस्नेहा |
शमयसि तमः प्रजानां शास्त्रमयेन स्थिरप्रदीपेन || 18 ||

रुढा वृषाचलपतेः पादे मुखकांतिपत्रलच्छाया |
करुणे सुखयसि विनतांकटाक्षविटपैः करापचेयफलैः || 19 ||

नयने वृषाचलेंदोस्तारामैत्रीं दधानया करुणे |
दृष्टस्त्वयैव जनिमानपवर्गमकृष्टपच्यमनुभवति || 20 ||

समयोपनतैस्तव प्रवाहैरनुकंपे कृतसंप्लवा धरित्री |
शरणागतसस्यमालिनीयं वृषशैलेशकृषीवलं धिनोति || 21 ||

कलशोदधिसंपदो भवत्याः करुणे सन्मतिमंथसंस्कृतायाः |
अमृतांशमवैमि दिव्यदेहं मृतसंजीवनमंजनाचलेंदोः || 22 ||

जलधेरिव शीतता दये त्वं वृषशैलाधिपतेस्स्वभावभूता |
प्रलयारभटींनटीं तदीक्षां प्रसभं ग्राहयसि प्रसक्तिलास्यं || 23 ||

प्रणतप्रतिकूलमूलघाती प्रतिघः कोऽपि वृषाचलेश्वरस्य |
कलमे यवसापचायनीत्या करुणे किंकरतां तवोपयाति || 24 ||

अबहिष्कृतनिग्रहान्विदंतः कमलाकांतगुणान्स्वतंत्रतादीन् |
अविकल्पमनुग्रहं दुहानां भवतीमेव दये भजंति संतः || 25 ||

कमलानिलयस्त्वया दयालुः करुणे निष्करुणा निरूपणे त्वं |
अत एव हि तावकाश्रितानां दुरितानां भवति त्वदेव भीतिः || 26 ||

अतिलंघितशासनेष्वभीक्ष्णं वृषशैलाधिपतिर्विजृंभितोष्मा |
पुनरेव दये क्षमानिदानैर्भवतीमाद्रियते भवत्यधीनैः || 27 ||

करुणे दुरितेषु मामकेषु प्रतिकारांतरदुर्जयेषु खिन्नः |
कवचायितया त्वयैव शार्ंगी विजयस्थानमुपाश्रितो वृषाद्रिं || 28 ||

मयि तिष्ठति दुष्कृतां प्रधाने मितदोषानितरान्विचिन्वती त्वं |
अपराधगणैरपूर्णकुक्षिः कमलाकांतदये कथं भवित्री || 29 ||

अहमस्म्यपराधचक्रवर्ती करुणे त्वं च गुणेषु सार्वभौमी |
विदुषी स्थितिमीदृशीं स्वयं मां वृषशैलेश्वरपादसात्कुरु त्वं || 30 ||

अशिथिलकरणेऽस्मिन्नक्षतश्वासवृत्तौ
वपुषि गमनयोग्ये वासमासादयेयं |
वृषगिरिकटकेषु व्यंजयत्सु प्रतीतै-
र्मधुमथनदये त्वां वारिधाराविशेषैः || 31 ||

अविदितनिजयोगक्षेममात्मानभिज्ञं
गुणलवरहितं मां गोप्तुकामा दये त्वं |
परवति चतुरैस्ते विभ्रमैः श्रीनिवासे
बहुमतिमनपायां विंदसि श्रीधरण्योः || 32 ||

फलवितरणदक्षं पक्षपातानभिज्ञं
प्रगुणमनुविधेयं प्राप्य पद्मासहायं |
महति गुणसमाजे मानपूर्वं दये त्वं
प्रतिवदसि यथार्हं पाप्मनां मामकानां || 33 ||

अनुभवितुमघौघं नालमागामिकालः
प्रशमयितुमशेषं निष्क्रियाभिर्न शक्यं |
स्वयमिति हि दये त्वं स्वीकृतश्रीनिवासा
शिथिलितभवभीतिश्श्रेयसे जायसे नः || 34 ||

अवतरणविशेषैरात्मलीलापदेशै-
रवमतिमनुकंपे मंदचित्तेषु विंदन् |
वृषभशिखरिनाथस्त्वन्निदेशेन नूनं
भजति चरणभाजां भाविनो जन्मभेदान् || 35 ||

परहितमनुकंपे भावयंत्यां भवत्यां
स्थिरमनुपधि हार्दं श्रीनिवासो दधानः |
ललितरुचिषु लक्ष्मीभूमिनीलासु नूनं
प्रथयति बहुमानं त्वत्प्रतिच्छंदबुद्ध्या || 36 ||

वृषगिरिसविधेषु व्याजतो वासभाजां
दुरितकलुषितानां दूयमाना दये त्वं |
करणविलयकाले कांदिशीकस्मृतीनां
स्मरयसि बहुलीलं माधवं सावधाना || 37 ||

दिशि दिशि गतिविद्भिर्देशिकैर्नीयमाना
स्थिरतरमनुकंपे स्त्यानलग्ना गुणैस्त्वं |
परिगतवृषशैलं पारमारोपयंती
भवजलधिगतानां पोतपात्री भवित्री || 38 ||

परिमितफलसंगात्प्राणिनः किंपचाना
निगमविपणिमध्ये नित्यमुक्तानुषक्तं |
प्रसदनमनुकंपे प्राप्तवत्यां भवत्यां
वृषगिरिहरिनीलं व्यंजितं निर्विशंति || 39 ||

त्वयि बहुमतिहीनः श्रीनिवासानुकंपे
जगति गतिमिहान्यां देवि सम्मन्यते यः |
स खलु विबुधसिंधौ सन्निकर्षे वहंत्यां
शमयति मृगतृष्णावीचिकाभिः पिपासां || 40 ||

आज्ञां ख्यातिं धनमनुचरानाधिराज्यादिकं वा
काले दृष्ट्वा कमलवसतेरप्यकिंचित्कराणि |
पद्माकांतं प्रणिहितवतीं पालनेऽनन्यसाध्ये
साराभिज्ञा जगति कृतिनस्संश्रयंते दये त्वां || 41 ||

प्राजापत्यप्रभृतिविभवं प्रेक्ष्य पर्यायदुःखं
जन्माकांक्षन् वृषगिरिवने जग्मुषां तस्थुषां वा |
आशासानाः कतिचन विभोः त्वत्परिष्वंगधन्यैः
अंगीकारं क्षणमपि दये हार्दतुंगैरपांगैः || 42 ||

नाभीपद्मस्फुरणसुभगा नव्यनीलोत्पलाभा
क्रीडाशैलं कमपि करुणे वृण्वती वेंकटाख्यं |
शीता नित्यं प्रसदनवती श्रद्धधानावगाह्या
दिव्या काचिज्जयति महती दीर्घिका तावकीना || 43 ||

यस्मिंदृष्टे तदितरसुखैर्गम्यते गोष्पदत्वं
सत्यं ज्ञानं त्रिभिरवधिभिर्मुक्तमानंदसिंधुं |
त्वत्स्वीकारात्तमिह कृतिनस्सूरिबृंदानुभाव्यं
नित्यापूर्वं निधिमिव दये निर्विशंत्यंजनाद्रौ || 44 ||

सारं लब्ध्वा कमपि महतः श्रीनिवासांबुराशेः
काले काले घनरसवती कालिकेवानुकंपे |
व्यक्तोन्मेषा मृगपतिगिरौ विश्वमाप्याययंती
शीलोपज्ञं क्षरति भवती शीतलं सद्गुणौघं || 45 ||

भीमे नित्यं भवजलनिधौ मज्जतां मानवाना-
मालंबार्थं वृषगिरिपतिस्त्वन्निदेशात्प्रयुंक्ते |
प्रज्ञासारं प्रकृतिमहता मूलभागेन जुष्टं
शाखाभेदैस्सुभगमनघं शाश्वतं शास्त्रपाणिं || 46 ||

विद्वत्सेवाकतकनिकषैर्वीतपंकाशयानां
पद्माकांतः प्रणयति दये दर्पणं ते स्वशास्त्रं |
लीलादक्षां त्वदनवसरे लालयन्विप्रलिप्सां
मायाशास्त्राण्यपि शमयितुं त्वत्प्रपन्नप्रतीपान् || 47 || [दमयितुं]

दैवात्प्राप्ते वृषगिरितटं देहिनि त्वन्निदाना-
त्स्वामिन्पाहीत्यवशवचने विंदति स्वापमंत्यं |
देवः श्रीमान् दिशति करुणे दृष्टिमिच्छंस्त्वदीया-
मुद्घातेन श्रुतिपरिषदामुत्तरेणाभिमुख्यं || 48 ||

श्रेयस्सूतिं सकृदपि दये सम्मतां यस्सखीं ते
शीतोदारामलभत जनः श्रीनिवासस्य दृष्टिं |
देवादीनामयमनृणतां देहवत्त्वेऽपि विंद-
न्बंधान्मुक्तो बलिभिरनघैः पूर्यते तत्प्रयुक्तैः || 49 ||

दिव्यापांगं दिशसि करुणे येषु सद्देशिकात्मा
क्षिप्रं प्राप्ता वृषगिरिपतिं क्षत्रबंध्वादयस्ते |
विश्वाचार्या विधिशिवमुखास्स्वाधिकारोपरुद्धा
मन्ये माता जड इव सुते वत्सला मादृशे त्वं || 50 ||

अतिकृपणोऽपि जंतुरधिगम्य दये भवती-
मशिथिलधर्मसेतुपदवीं रुचिरामचिरात् |
अमितमहोर्मिजालमतिलंघ्य भवांबुनिधिं
भवति वृषाचलेशपदपत्तननित्यधनी || 51 ||

अभिमुखभावसंपदभिसंभविनां भविनां
क्वचिदुपलक्षिता क्वचिदभंगुरगूढगतिः |
विमलरसावहा वृषगिरीशदये भवती
सपदि सरस्वतीव शमयत्यघमप्रतिघं || 52 ||

अपि करुणे जनस्य तरुणेंदुविभूषणता-
मपि कमलासनत्वमपि धाम वृषाद्रिपतेः |
तरतमतावशेन तनुते ननु ते विततिः
परहितवर्ष्मणा परिपचेलिमकेलिमती || 53 ||

धृतभुवना दये त्रिविधगत्यनुकूलतरा
वृषगिरिनाथपादपरिरंभवती भवती |
अविदितवैभवाऽपि सुरसिंधुरिवातनुते
सकृदवगाहमानमपतापमपापमपि || 54 ||

निगमसमाश्रिता निखिललोकसमृद्धिकरी
भजदघकूलमुद्वहगतिः परितप्तहिता |
प्रकटितहंसमत्स्यकमठाद्यवतारशता
विबुधसरिच्छ्रियं वृषगिरीशदये वहसि || 55 ||

जगति मितंपचा त्वदितरा तु दये तरला
फलनियमोज्झिता भवति संतपनाय पुनः |
त्वमिह निरंकुशप्रशकनादिविभूतिमती
वितरसि देहिनां निरवधिं वृषशैलनिधिं || 56 ||

सकरुणलौकिकप्रभुपरिग्रहनिग्रहयो-
र्नियतिमुपाधिचक्रपरिवृत्तिपरंपरया |
वृषभमहीधरेशकरुणे वितरंगयतां
श्रुतिमितसंपदि त्वयि कथं भविता विशयः || 57 ||

वृषगिरिकृष्णमेघजनितां जनितापहरां
त्वदभिमतिं सुवृष्टिमुपजीव्य निवृत्ततृषः |
बहुषु जलाशयेषु बहुमानमपोह्य दये
न जहति सत्पथं जगति चातकवत्कृतिनः || 58 ||

त्वदुदयतूलिकाभिरमुना वृषशैलजुषा
स्थिरतरशिल्पिनैव परिकल्पितचित्रधियः |
यतिपतियामुनप्रभृतयः प्रथयंति दये
जगति हितं न नस्त्वयि भरन्यसनादधिकं || 59 ||

मृदुहृदये दये मृदितकामहिते महिते
धृतविबुधे बुधेषु विततात्मधुरे मधुरे |
वृषगिरिसार्वभौमदयिते मयि ते महतीं
भवुकनिधे निधेहि भवमूलहरां लहरीं || 60 ||

अकूपारैरेकोदकसमयवैतंडिकजवै-
रनिर्वाप्यां क्षिप्रं क्षपयितुमविद्याख्यबडबां |
कृपे त्वं तत्तादृक्प्रथिमवृषपृथ्वीधरपति-
स्वरूपद्वैगुण्यद्विगुणनिजबिंदुः प्रभवसि || 61 ||

विवित्सावेतालीविगमपरिशुद्धेऽपि हृदये
पटुप्रत्याहारप्रभृतिपुटपाकप्रचकिताः |
नमंतस्त्वां नारायणशिखरिकूटस्थकरुणे
निरुद्धत्वद्द्रोहा नृपतिसुतनीतिं न जहति || 62 ||

अनन्याधीनस्सन्भवति परतंत्रः प्रणमतां
कृपे सर्वद्रष्टा न गणयति तेषामपकृतिं |
पतिस्त्वत्पारार्थ्यं प्रथयति वृषक्ष्माधरपति-
र्व्यवस्थां वैयात्यादिति विघटयंती विहरसि || 63 ||

अपां पत्युश्शत्रूनसहनमुनेर्धर्मनिगलं
कृपे काकस्यैकं हितमिति हिनस्ति स्म नयनं |
विलीनस्वातंत्र्यो वृषगिरिपतिस्त्वद्विहृतिभि-
र्दिशत्येवं देवो जनितसुगतिं दंडनगतिं || 64 ||

निषादानां नेता कपिकुलपतिः कापि शबरी
कुचेलः कुब्जा सा व्रजयुवतयो माल्यकृदिति |
अमीषां निम्नत्वं वृषगिरिपतेरुन्नतिमपि
प्रभूतैस्स्रोतोभिः प्रसभमनुकंपे शमयसि || 65 ||

त्वया दृष्टस्तुष्टिं भजति परमेष्ठी निजपदे
वहन्मूर्तीरष्टौ विहरति मृडानीपरिबृढः |
बिभर्ति स्वाराज्यं वृषशिखरिशृंगारिकरुणे
शुनासीरो देवासुरसमरनासीरसुभटः || 66 ||

दये दुग्धोदन्वद्भ्रयतियुतसुधासिंधुनयत-
स्त्वदाश्लेषान्नित्यं जनितमृतसंजीवनदशाः |
स्वदंते दांतेभ्यश्श्रुतिवदनकर्पूरगुलिका
विवृण्वंतश्चित्तं वृषशिखरिविश्वंभरगुणाः || 67 ||

जगज्जन्मस्थेमप्रलयरचनाकेलिरसिको
विमुक्त्यैकद्वारं विघटितकवाटं प्रणयिनां |
इति त्वय्यायत्तं द्वितयमुपधीकृत्य करुणे
विशुद्धानां वाचां वृषशिखरिनाथस्स्तुतिपदं || 68 ||

कलिक्षोभोन्मीलत्क्षितिकलुषकूलंकषजवै-
रनुच्छेदै रेतैरवटतटवैषम्यरहितैः |
प्रवाहैस्ते पद्मासहचरपरिष्कारिणि कृपे
विकल्पंतेऽनल्पा वृषशिखरिणो निर्झरगुणाः || 69 ||

खिलं चेतोवृत्तेः किमिदमिति विस्मेरभुवनं
कृपे सिंहक्ष्माभृत्कृतमुखचमत्कारकरणं |
भरन्यासच्छन्नप्रबलवृजिनप्राभृतभृतां
प्रतिप्रस्थानं ते श्रुतिनगरशृंगाटकजुषः || 70 ||

त्रिविधचिदचित्सत्तास्थेमप्रवृत्तिनियामिका
वृषगिरिविभोरिच्छा सा त्वं परैरपराहता |
कृपणभरभृत्किंकुर्वाणप्रभूतगुणांतरा
वहसि करुणे वैचक्षण्यं मदीक्षणसाहसे || 71 ||

वृषगिरिपतेर्हृद्या विश्वावतारसहायिनी
क्षपितनिखिलावद्या देवि क्षमादिनिषेविता |
भुवनजननी पुंसां भोगापवर्गविधायिनी
वितमसि पदे व्यक्तिं नित्यां बिभर्षि दये स्वयं || 72 ||

स्वयमुदयिनस्सिद्धाद्याविष्कृताश्च शुभालया
विविधविभवव्यूहावासाः परं च पदं विभोः |
वृषगिरिमुखेष्वेतेष्विच्छावधि प्रतिलब्धये
दृढविनिहिता निश्रेणिस्त्वं दये निजपर्वभिः || 73 ||

हितमिति जगद्दृष्ट्या क्लुप्तैरक्लुप्तफलांतरै-
रमतिविहितैरन्यैर्धर्मायितैश्च यदृच्छया |
परिणतबहुच्छद्मा पद्मासहायदये स्वयं
प्रदिशसि निजाभिप्रेतं नः प्रशाम्यदपत्रपा || 74 ||

अतिविधिशिवैरैश्वर्यात्मानुभूतिरसैर्जना-
नहृदयमिहोपच्छंद्यैषामसंगदशार्थिनी |
तृषितजनतातीर्थस्नानक्रमक्षपितैनसां
वितरसि दये वीतातंका वृषाद्रिपतेः पदं || 75 ||

वृषगिरिसुधासिंधौ जंतुर्दये निहितस्त्वया
भवभयपरीतापच्छित्त्यै भजन्नघमर्षणं |
मुषितकलुषो मुक्तेरग्रेसरैरभिपूर्यते
स्वयमुपनतैस्स्वात्मानंदप्रभृत्यनुबंधिभिः || 76 ||

अनितरजुषामंतर्मूलेऽप्यपायपरिप्लवे
कृतविदनघा विच्छिद्यैषां कृपे यमवश्यतां |
प्रपदनफलप्रत्यादेशप्रसंगविवर्जितं
प्रतिविधिमुपाधत्से सार्धं वृषाद्रिहितैषिणा || 77 ||

क्षणविलयिनां शास्त्रार्थानां फलाय निवेशिते
पितृसुरगणे निर्वेशात्प्रागपि प्रलयं गते |
अधिगतवृषक्ष्माभृन्नाथामकालवशंवदां
प्रतिभुवमिह व्याचख्युस्त्वां कृपे निरुपप्लवां || 78 ||

त्वदुपसदनादद्य श्वो वा महाप्रलयेऽपि वा
वितरति निजं पादांभोजं वृषाचलशेखरः |
तदिह करुणे तत्तत्क्रीडातरंगपरंपरा-
तरतमतया जुष्टायास्ते दुरत्ययतां विदुः || 79 ||

प्रणिहितधियां त्वत्संपृक्ते वृषाद्रिशिखामणौ
प्रसृमरसुधाधाराकारा प्रसीदति भावना |
दृढमिति दये दत्तास्वादं विमुक्तिवलाहकं
निभृतगरुतो निध्यायंति स्थिराशयचातकाः || 80 ||

कृपे विगतवेलया कृतसमग्रपोषैस्त्वया
कलिज्वलनदुर्गते जगति कालमेघायितं |
वृषक्षितिधरादिषु स्थितिपदेषु सानुप्लवै-
र्वृषाद्रिपतिविग्रहैर्व्यपगताखिलावग्रहैः || 81 ||

प्रसूय विविधं जगत्तदभिवृद्धये त्वं दये
समीक्षणविचिंतनप्रभृतिभिस्स्वयं तादृशैः |
विचित्रगुणचित्रितां विविधदोषवैदेशिकीं
वृषाचलपतेस्तनुं विशसि मत्स्यकूर्मादिकां || 82 ||

युगांतसमयोचितं भजति योगनिद्रारसं
वृषक्षितिभृदीश्वरे विहरणक्रमाज्जाग्रति |
उदीर्णचतुरर्णवीकदनवेदिनीं मेदिनीं
समुद्धृतवती दये त्वदभिजुष्टया दंष्ट्रया || 83 ||

सटापटलभीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधि परिस्फुटभ्रुकुटिकेऽपि वक्त्रे कृते |
दये वृषगिरीशितुर्दनुजडिंभदत्तस्तना
सरोजसदृशा दृशा समुदिताकृतिर्दृश्यसे || 84 ||

प्रसक्तमधुना विधिप्रणिहितैस्सपर्योदकै-
स्समस्तदुरितच्छिदा निगमगंधिना त्वं दये |
अशेषमविशेषतस्त्रिजगदंजनाद्रीशितु-
श्चराचरमचीकरश्चरणपंकजेनांकितं || 85 ||

परश्वथतपोधनप्रथनसत्कृतूपाकृत-
क्षितीश्वरपशुक्षरत्क्षतजकुंकुमस्थासकैः |
वृषाचलदयालुना ननु विहर्तुमालिप्यथाः
निधाय हृदये दये निहतरक्षितानां हितं || 86 ||

कृपे कृतजगद्धिते कृपणजंतुचिंतामणे
रमासहचरं तदा रघुधुरीणयंत्या त्वया |
व्यभज्यत सरित्पतिस्सकृदवेक्षणात्तत्क्षणा-
त्प्रकृष्टबहुपातकप्रशमहेतुना सेतुना || 87 ||

कृपे परवतस्त्वया वृषगिरीशितुः क्रीडितं
जगद्धितमशेषतस्तदिदमित्थमर्थाप्यते |
मदच्छलपरिच्युतप्रणतदुष्कृतप्रेक्षितै-
र्हतप्रबलदानवैर्हलधरस्य हेलाशतैः || 88 ||

प्रभूतविबुधद्विषद्धरणखिन्नविश्वंभरा-
भरापनयनच्छलात्त्वमवतार्य लक्ष्मीधरं |
निराकृतवती दये निगमसौधदीपश्रिया
विपश्चिदविगीतया जगति गीतयाऽंधं तमः || 89 ||

वृषाद्रिहयसादिनः प्रबलदोर्मरुत्प्रेंखित-
स्त्विषा स्फुटतटिद्गुणस्त्वदवसेकसंस्कारवान् |
करिष्यति दये कलिप्रबलघर्मनिर्मूलनं
पुनः कृतयुगांकुरं भुवि कृपाणधाराधरः || 90 ||

विश्वोपकारमिति नाम सदा दुहाना-
मद्यापि देवि भवतीमवधीरयंतं |
नाथे निवेशय वृषाद्रिपतौ दये त्वं
न्यस्तस्वरक्षणभरं त्वयि मां त्वयैव || 91 ||

नैसर्गिकेण तरसा करुणे नियुक्ता
निम्नेतरेऽपि मयि ते विततिर्यदि स्यात् |
विस्मापयेद्वृषगिरीश्वरमप्यवार्या
वेलातिलंघनदशेव महांबुराशेः || 92 ||

विज्ञातशासनगतिर्विपरीतवृत्त्या
वृत्रादिभिः परिचितां पदवीं भजामि |
एवं विधे वृषगिरीशदये मयि त्वं
दीने विभोश्शमय दंडधरत्वलीलां || 93 ||

मासाहसोक्तिघनकंचुकवंचितान्यः
पश्यत्सु तेषु विदधाम्यतिसाहसानि |
पद्मासहायकरुणे न रुणत्सि किं त्वं
घोरं कुलिंगशकुनेरिव चेष्टितं मे || 94 ||

विक्षेपमर्हसि दये विपलायितेऽपि
व्याजं विभाव्य वृषशैलपतेर्विहारं |
स्वाधीनसत्वसरणिस्स्वयमत्र जंतौ
द्राघीयसी दृढतरा गुणवागुरा त्वं || 95 ||

संतन्यमानमपराधगणं विचिंत्य
त्रस्यामि हंत भवतीं च विभावयामि |
अह्नाय मे वृषगिरीशदये जहीमा-
माशीविषग्रहणकेलिनिभामवस्थां || 96 ||

औत्सुक्यपूर्वमुपहृत्य महापराधा-
न्मातः प्रसादयितुमिच्छति मे मनस्त्वां |
आलिह्य तान्निरवशेषमलब्धतृप्ति-
स्ताम्यस्यहो वृषगिरीशधृता दये त्वं || 97 ||

जह्याद्वृषाचलपतिः प्रतिघेऽपि न त्वां
घर्मोपतप्त इव शीतलतामुदन्वान् |
सा मामरुंतुदभरन्यसनानुवृत्ति-
स्तद्वीक्षणैः स्पृश दये तव केलिपद्मैः || 98 ||

दृष्टेऽपि दुर्बलधियं दमनेऽपि दृप्तं
स्नात्वाऽपि धूलिरसिकं भजनेऽपि भीमं |
बद्ध्वा गृहाण वृषशैलपतेर्दये मां
त्वद्वारणं स्वयमनुग्रहशृंखलाभिः || 99 ||

नातः परं किमपि मे त्वयि नाथनीयं
मातर्दये मयि कुरुष्व तथा प्रसादं |
बद्धादरो वृषगिरिप्रणयी यथाऽसौ
मुक्तानुभूतिमिह दास्यति मे मुकुंदः || 100 ||

निस्सीमवैभवजुषां मिषतां गुणानां
स्तोतुर्दये वृषगिरीशगुणेश्वरीं त्वां |
तैरेव नूनमवशैरभिनंदितं मे
सत्यापितं तव बलादकुतोभयत्वं || 101 ||

अद्यापि तद्वृषगिरीशदये भवत्या-
मारंभमात्रमनिदं प्रथमस्तुतीनां |
संदर्शितस्वपरनिर्वहणा सहेथाः
मंदस्य साहसमिदं त्वयि वंदिनो मे || 102 ||

प्रायो दये त्वदनुभावमहांबुराशौ
प्राचेतसप्रभृतयोऽपि परं तटस्थाः |
तत्रावतीर्णमतलस्पृशमाप्लुतं मां
पद्मापतेः प्रहसनोचितमाद्रियेथाः || 103 ||

वेदांतदेशिकपदे विनिवेश्य बालं
देवो दयाशतकमेतदवादयन्मां |
वैहारिकेण विधिना समये गृहीतं
वीणाविशेषमिव वेंकटशैलनाथः || 104 ||

अनवधिमधिकृत्य श्रीनिवासानुकंपा-
मवितथविषयत्वाद्विश्वमव्रीळयंती |
विविधकुशलनीवी वेंकटेशप्रसूता
स्तुतिरियमनवद्या शोभते सत्वभाजां || 105 ||

शतकमिदमुदारं सम्यगभ्यस्यमानान्
वृषगिरिमधिरुह्य व्यक्तमालोकयंती |
अनितरशरणानामाधिराज्येऽभिषिंचे-
च्छमितविमतपक्षा शार्ंगधन्वानुकंपा || 106 ||

विश्वानुग्रहमातरं व्यतिषजत्स्वर्गापवर्गौ सुधा-
सध्रीचीमिव वेंकटेश्वरकविर्भक्त्या दयामस्तुत |
पद्मानामिह यद्विधेयभगवत्संकल्पकल्पद्रुमा-
ज्जंझामारुतधूतचूतनयतस्सांपातिकोऽयं क्रमः || 107 ||

कामं संतु मिथः करंबितगुणावद्यानि पद्यानि नः
कस्यास्मिन् शतके सदंबुकतके दोषश्रुतिं क्षाम्यति |
निष्प्रत्यूहवृषाद्रिनिर्झरझरत्कारच्छलेनोच्चल-
द्दीनालंबनदिव्यदंपतिदयाकल्लोलकोलाहलः || 108 ||

इति श्रीकवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंकटनाथस्य वेदांताचार्यस्य कृतिषु दयाशतकं |